DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

READINGS IN SANSKRIT
PART 3

# WEEK ONE

DIAMOND MOUNTAIN UNIVERSITY

Readings in Sanskrit, 3
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Spring Term, Class Schedule

**WEEK ONE: Thursday, April 24, 2008, 1:00 – 4:00 PM**

A. Quiz
B. Review of homework from the break (Nagarjuna, Chapter 24)

**HOMEWORK:**

1. Provide a word by word English translation of verses below from the भगवद् गीता
2. Provide a word by word English translation of Chapter 25 of Arya Nagarjuna's मूलमध्यमककारिका (see below).

## भगवद् गीता

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ १०-३९ ॥

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ १०-४० ॥

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।

तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ॥ १०-४१ ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ १०-४२ ॥

## मूलमध्यमककारिका

### निर्वाणपरीक्षा नाम पञ्चविंशतितमं प्रकरणं

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः।

प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमिष्यते॥ १

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः।

प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमियते॥ २

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतं।

अनिरुद्धमनुत्पन्नमेतन्निर्व्अमुच्यते॥ ३

भावस्तावन्न निर्वाणं जरामरणलक्षणं।
प्रसज्येतास्ति भावो हि न जरामरणं विना॥ ४

भावश्च यदि निर्वाणं निर्वाणं संस्कृतं भवेत्।
नासंस्कृतो हि विद्यते भावः क्व चन कश्चन॥ ५

भावश्च यदि निर्वाणमनुपादाय तत्कथं।
निर्वाणं नानुपादाय कश्चिद्भावो हि विद्यते॥ ६

यदि भावो न निर्वाणमभावः किं भविष्यति।
निर्वाणं यत्र भावो न नाभावस्तत्र विद्यते॥ ७

यद्यभावश्च निर्वाणमनुपादाय तत्कथं।
निर्वाणं न ह्यभावो ऽस्ति यो ऽनुपादाय विद्यते॥ ८

य आजवंजवीभाव उपादाय प्रतीत्य वा।
सो ऽप्रतीत्यानुपादाय निर्वाणमुपदिश्यते॥ ९

प्रहाणं चाब्रवीच्चास्ता भवस्य विभवस्य च।
तस्मान्न भावो नाभावो निर्वाणमिति युज्यते॥ १०

भवेदभावो भावश्च निर्वाणमुभयं यदि।
भवेदभावो भावश्च मोक्षस्तच्च न युज्यते॥ ११

भवेदभावो भावश्च निर्वाणमुभयं यदि।
नानुपादाय निर्वाणमुपादायोभयं हि तत्॥ १२

भवेदभावो भावश्च निर्वाणमुभयं कथं।
असंस्कृतं च निर्वाणं भावाभावौ च संस्कृतौ॥ १३

भवेदभावो भावश्च निर्वाण उभयं कथं।
न तयोरेकत्रास्तित्वमालोकतमसोर्यथा॥ १४

नैवाभावो नैव भावो निर्वाणमिति या ऽञ्जना।
अभावे चैव भावे च सा सिद्धे सति सिध्यति॥ १५

नैवाभावो नैव भावो निर्वाणं यदि विद्यते।
नैवाभावो नैव भाव इति केन तदज्यते॥ १६

परं निरोधाभगवान् भवतीत्येव नोह्यते।
न भवत्युभयं चेति नोभयं चेति नोह्यते॥ १७

तिष्ठमानो ऽपि भगवान् भवतीत्येव नोह्यते।
न भवत्युभयं चेति नोभयं चेति नोह्यते॥ १८

न संसारस्य निर्वाणात्किं चिदस्ति विशेषणं।
न निर्वाणस्य संसारात्किं चिदस्ति विशेषणं॥ १९

निर्वाणस्य च या कोटिः कोटिः संसरणस्य च।
न तयोरन्तरं किं चित्सुसूक्ष्ममपि विद्यते॥ २०

परं निरोधादन्ताद्याः शाश्वताद्याश्च दृष्टयः।
निर्वाणमपरान्तं च पूर्वान्तं च समाश्रिताः॥ २१

शून्येषु सर्वधर्मेषु किमनन्तं किमन्तवत्।
किमनन्तमन्तवच्च नानन्तं नान्तवच्च किम्॥ २२

किं तदेव किमन्यत्किं शाश्वतं किमशाश्वतं।
अशाश्वतं शाश्वतं च किं वा नोभयमप्यतः॥ २३

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्व चित्कस्य चित्कश्चिद्धर्मो बुद्धेन देशितः॥ २४